तत्त्वन्यासः, पुं, (तत्त्वानां न्यासः ।) विष्णुपूजाविषयकन्यासविशेषः । यथा,—
"मातृकान्तानथार्णांश्च जीवाद्येकैकशो वदेत् ।
नमः परायेत्युच्चार्य्य ततस्तत्त्वात्मने नमः ॥
जीवं प्राणं द्वयं प्रोक्ता सर्व्वाङ्गेषु प्रविन्यसेत् ।
ततो हृदयमध्ये च तत्त्वत्रयश्च विन्यसेत् ॥
इत्यच्युतोक्ततनुर्व्विदधीत तत्त्व-
न्यासं मपूर्व्वकमराचरनत्युपेतम् ।
भूयः पराय च तदाक्रयमात्मने च
नत्यन्तसुद्धरतु तत्त्वमनुक्रमेण ॥
सकलवपुषि जीवं प्राणमायोज्य मध्ये
न्यसतु मतिमहङ्कारं मनश्चेति मन्त्री ।
कसुखहृदयगुह्याङ्घ्र्यवयोश्शब्दपूर्व्वं
गुणगणमथ कर्णादिस्थितं श्रोत्रपूर्व्वम् ॥
वागादीन्द्रियवर्गमात्मनिजये त्वाकाशपूर्व्वं गणं
मूर्द्धास्ये हृदये शिरे चरणयोर्हृत्पुण्डरीकं हृदि॥
मं बीजं हृत्पुण्डरीकतत्त्वं हृदि प्रविन्यसेत् ।
हं बीजं सूर्य्यमण्डलतत्त्वं हृदि प्रविन्यसेत् ॥
सं बीजं चन्द्रमण्डलतत्त्वं तत्र प्रविन्यसेत् ।
रं बीजं वह्निमण्डलतत्त्वं तत्रैव विन्यसेत् ॥
षं बीजं परमेष्ठितत्त्वं वासुदेवञ्च मूर्द्धनि ।
यं बीजमथ पुंस्तत्त्वं सङ्कर्षणमथो मुखे ॥
लं बीजं विश्वतत्त्वञ्च प्रद्युम्नञ्च हृदि न्यसेत् ।
वं बीजं निवृत्तितत्त्वञ्च अनिरुद्धमुपस्थके ॥
लं बीजं सर्व्वतत्त्वञ्च पादे नारायणं न्यसेत् ।
क्ष्रौं बीजं कोपतत्त्वञ्च नृसिंहं सर्व्वगात्रके ॥
एवं तत्त्वानि विन्यस्य प्राणायामं समाचरेत् ॥"
अस्य फलं यथा,—
"तत्त्वन्यासं ततः कुर्य्यात् साधकः सिद्धिहेतवे ।
हतेन येन देवस्य रूपतामेव यात्यसौ ॥"
इति गौतमीयतन्त्रम् ॥

तत्पर:, त्रि, (सः परोऽस्य । यद्वा, तदेव परं सर्व्वोत्तममस्य ।) आसक्तः । इत्यमरः । ३ । १ । ८ ॥ (यथा, भागवते । ४ । १५ । ६ ।
"एष साक्षाद्धरेरंशो जातो लोकरिरक्षया ।
इयञ्च तत्परा हि श्रीरनुजज्ञेऽनपायिनी ॥")

तत्परायणः, त्रि, (तदेव परमयनमस्य ।) तदासक्तः । यथा,—
"शुद्धा भवन्ति यद्यन्येऽन्त्यजाः कृष्णपरायणाः ॥"
इति पद्मोत्तरखण्डम् ॥

तत्फलः, पुं, (तदेव फलमस्य । यद्वा, तनोति तन्यते वा । तन+क्विप् तुक् च । तत् विस्तृतं फलमस्य ।) कुवलयम् । कुष्ठनामौषधिः । चौरनामसुगन्धिद्रव्यम् । इति धरणिः ॥

तन्त्र, इ कुटुम्बधारणे । इति प्राञ्चः । (भ्वां-परं-अकं-सेट् ।) द्वावेतौ धारणेऽर्थे वर्त्तेते । इति चान्द्राः । केचित्तु कुटुम्बधातुममन्यमानास्तन्त्रिधातुः कुटुम्बस्य धारणेऽर्थे वर्त्तते इत्याहुः । तन्त्र धारणे इत्यनेनैवेष्टसिद्धे इदनुबन्धो वेदेषूच्चारणभेदार्थः । इति दुर्गादासः ॥

मन्त्र } इ सादे । मोहे । (भ्वां-परं-अकं-सेट् ।)
तन्द्र } दन्त्यवर्गाद्योपधः । तन्द्रीः । दन्त्यवर्गतृतीयोपधः । इति केचित् । तन्द्रीः । सौत्रधातुरयम् । इति दुर्गादासः ॥

तन्त्र, इ क ङ धारणे । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) आदिमध्ययोस्तकारः शेषो रेफयुक्तः । धारणं धरणम् । भाषायामस्य विस्तारणे प्रायः प्रयोगः । इ क ङ, तन्त्रयते तन्तून् तन्त्रवायः । इति दुर्गादासः ॥

तत्र, व्य, (तस्मिन्निति । तद्+"सप्तम्यास्त्रल् ।" ५।३।१० । इति त्रल् ।) तस्मिन् । तयोः । तेषु । इति व्याकरणम् ॥ सेखाने इति भाषा । (यथा, मनुः । २ । ११२ ।
"धर्म्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ।
तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे ॥")

तत्रत्यः, त्रि, तत्र भवः । (तद्+"अव्ययात्त्यप् ।" ४।२।१०४ । इत्यस्य "अमेहक्वतसित्रेभ्य एव ।" इति वार्त्तिकोक्त्या त्यप् ।) तस्मिन्नुत्पन्नः । इति मुग्धबोधव्याकरणम् ॥ (यथा, कथासरित्सागरे । ५ । ८८ ।
"प्राप्तस्यैव च तत्रत्यो जनोऽरोदीत् पुरो मम ॥")

तत्रभवान्, [त्] त्रि, (इतराभ्योऽपि दृश्यन्ते इति प्राग्दीव्यतीयः प्रथमार्थे त्रल् । ततः सुप्सुपेति समासः ।) पूज्यः । इति जटाधरः ॥

तथा, व्य, (तेन प्रकारेण । तद्+"प्रकारवचने थाल् ।" ५ ।३।२३ । इति थाल् । तेन प्रकारेणेत्यर्थः । यथा, मनुः । १ । ४ ।
"स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः ।
प्रत्युवाचार्च्य तान् सर्व्वान् महर्षीन् श्रूयतामिति ॥")
साम्यम् । इत्यमरः । ३ । ४ । ८ ॥ (यथा, मनुः । ६ । ९० ।
"यथा नदीनदाः सर्व्वे सागरे यान्ति संस्थितिम् ।
तथैवाश्रमिणः सर्व्वे गृहस्थे यान्ति संस्थितिम् ॥")
अभ्युपगमः । पृष्टप्रतिवाक्यम् । समुच्चयः । (यथा, देवीभागवते । १ । २ । २६ ।
"सपादलक्षञ्च तथा भारतं मुनिना कृतम् ।
इतिहास इति प्रोक्तं पञ्चमं वेदसम्मतम् ॥")
निश्चयः । इति मेदिनी । थे, ३६ ॥ (यथा, रघुः । १ । २९ ।
"तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथा हि सर्व्वे तस्यासन् परार्थैकफला गुणाः ॥")

तथागतः, पुं, (यथा पुनरावृत्तिर्न भवति तथा तेन प्रकारेण गतः । यद्वा, तथा सत्यं गतं ज्ञानं यस्य । सुप्सुपेति समासः ।) बुद्धः । इत्यमरः ।१।१।१३ ॥ (यथा, सर्व्वदर्शनसंग्रहे ।
"यथा गतास्ते सुनयः शिवां गतिं
तथा गतिं सोऽपि गतस्तथागतः ॥"*॥
तथा तेन प्रकारेणागतः ।) पूर्व्वोक्तप्रकारेणागते, त्रि ॥ (यथा, महाभारते । ३।७७।५ ।
"ततो बभूव नगरे सुमहान् हर्षजः स्वनः ।
जनस्य संप्रहृष्टस्य नलं दृष्ट्वा तथागतम् ॥")

तथाच, व्य, (तथा च, च च इति द्वन्द्वसमासः ।) पूर्व्वोक्तार्थदृढीकरणम् । इति संक्षिप्तसारव्याकरणम् ॥ (यथा, मनुः । ९ । १९ ।
"तथाच श्रुतयो बह्व्यो निगीता निगमेष्वपि ॥"
अव्ययद्वयेनैव सिद्धेः केचिदयं शब्दो न मन्यते ॥)

तथैव, व्य, (तथा च एव च ।) तद्वदेव । सेइ प्रकार इति भाषा । यथा, चाणक्ये । ४२ ।
"अस्ति पुत्त्रो वशे यस्य भार्य्या भर्त्तुस्तथैव च ॥"
अव्ययद्वयेनैव सिद्धेः केचिच्छब्दोऽयं न मन्यते ॥)

तथ्यं, क्ली, (तथा साधु । तथा+"तत्र साधुः ।" ४ । ४ । ९८ । इति यत् ।) सत्यम् । (यथा, मनुः । ८ । २७४ ।
"काणं वाप्यथवा खञ्जमन्यं वापि तथाविधम् ।
तथ्येनापि ब्रुवन् दाप्यो दण्डं कार्षापणावरम् ॥")
तद्वति त्रि । इत्यमरः । १ । ६ । २२ ॥ (यथा, महाभारते । ७ । १५७ । ३ ।
"यदर्ज्जुनगुणांस्तथ्यान् कीर्त्तयानं नराधम ! ।
शूरद्वेषात् सुदुर्बुद्धे ! त्वं भर्त्सयसि मातुलम् ॥")

तदा, व्य, (तस्मिन् काले । "तदो दा च ।" ५ । ३ । १९ । इति दा ।) तस्मिन् काले । इत्यमरः । ३ । ४ । २२ ॥ सेइ समये इति भाषा ॥ (यथा, मनुः । १ । ५५ ।
"न च स्वं कुरुते कर्म्म तदोत्क्रामति मूर्त्तितः ॥")

तदात्वं, क्ली, (तदा इत्यस्य भावः । तदा+"तस्य भावस्त्वतलौ ।" ५ । १ । ११९ । इति त्व ।) तत्कालः । वर्त्तमानकालः । इत्यमरः ।२।८।२९॥ (यथा, महाभारते । २ । ५९ । १४ ।
"स चोपभोगलोभान्धो हिरण्यार्थे परन्तप ! ।
आयतिञ्च तदात्वञ्च उभे सद्यो व्यनाशयत् ॥")

तदानीं, [म्] व्य, (तस्मिन् काले । "तदो दा च ।" । ५ । ३ । १९ । इति चकारात् दानीम् ।) तस्मिन् काले । इत्यमरः ।३।४।२२ ॥ (यथा, ऋग्वेदे । १० । १२९ । १ ।
"नासदासीन्नोसदासीत्तदानीं
नासीद्रजो नो व्योमा परो यत् ॥")

तदासुखं, क्ली, (तदा तस्मिन्नेव काले सुखं यस्य ।) आरम्भः । इति भूरिप्रयोगः ॥

तद्दिनं, [म्] व्य, (तत् प्रखरकिरणत्वेन प्रसिद्धं दिनं दिनांशः ।) दिनमध्यम् । (तत्तदेव दिनम् ।) प्रतिदिनम् । इति हेमचन्द्रः ॥ (तदेव दिनम् ।) पूर्व्वोक्तदिने, क्ली ॥

तद्धनः, त्रि, (तदेव अव्ययेनाहीनं धनं यस्य ।) कृपणः । इति हेमचन्द्रः । २ । ३२ ॥ (तदेव धनमिति विग्रहे पूर्व्वोक्तधने, क्ली ॥)

तद्बलः, पुं, (तस्मिन् लक्ष्ये एव बलं यस्य ।) बाणविशेषः । इति हेमचन्द्रः । ३ । ४४४ ॥

तन, उ कि उपकृतौ । श्रद्धाघाते । शब्दोपतापयोः । इति कविकल्पद्रुमः ॥ (चुरां पक्षे भ्वां-परं-अकं-सकं च-सेट् । उदित्त्वात् क्त्वावेट् ।) उ, तनित्वा तत्वा । कि, तानयति तनति । उपकृतिरुपकारः । अघातो हिंसावर्ज्जनम् । सुनीतिरिति गोविन्दभट्टः । उपसर्गादेर्थके । देवैकं दीर्घीकरणम् । वितानयति यः कीर्त्तिं वितनत्यमलं यशः । इति हलायुधः । इति दुर्गादासः ॥